# (४४) स्थाननिरूपणम्

देशसामान्यं स्थानम्। तद् द्विविधम् । पाठसादेश्यमनुष्ठानसादेश्यं चेति । स्थानं क्रमश्चेत्यनर्थान्तरम् । पाठसादेश्यमपि द्विविधम् । यथासन्निधिपाठः यथासङ्ख्यपाठश्चेति ।। ४४।।

# (४५) यथासङ्ख्यपाठः

तत्र 'ऐन्द्राग्नमेकादशपालं निर्वपेत्' । 'वैश्वानरं द्वादशकपालं निर्वपे' दित्येवं क्रमविहितेषु 'इन्द्राग्नी रोचनादिव' इत्यादीनां याज्या-नुवाक्यामन्त्राणां यथासङ्ख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवं रूपो विनियोगो यथासङ्ख्यपाठात् । प्रथमपठितमन्त्रस्य हि कैमर्थ्याकाङ्क्षायां प्रथमतो विहितं कर्मैव प्रथममुपतिष्ठते समान-देशत्वात् । एवं द्वितीयमन्त्रस्यापि ।।४५।।

# (४६) सन्निधिपाठः

वैकृताङ्गानां प्राकृताङ्गाननुवादेन विहितानां सन्दंशापतितानां विकृत्यर्थत्वं सन्निधिपाठात् । यथा आमनहोमानाम् । तेषां हि कैमर्थ्याकाङ्क्षायां फलं विकृत्यपूर्वमेव भाव्यत्वेन सम्बध्यते । उपस्थितत्वात् । स्वतन्त्रफलकत्वे विकृतिसन्निधिपाठानर्थक्यापत्तेः ।। ४६ ।।

# (४७) अनुष्ठानसादेश्यम्

पशुधर्माणामग्नीषोमीयार्थत्वमनुष्ठानसादेश्यात् ।
औपवसथ्येऽह्नि अग्निषोमीयः पशुरनुष्ठीयते तस्मिन्नेव
दिने ते धर्माः पठ्यन्ते । अतस्तेषां
कैमर्थ्याकाङ्क्षायामनुष्ठेयत्वेनोपस्थितं पश्वपूर्वमेव
भाव्यत्वेन सम्बध्यते ।।४७।।

# (४८) स्थानं समाख्यातः प्रबलम्

तच्च स्थानं समाख्यातः प्रबलम् । अत एव शुन्धनमन्त्रः सान्नाय्यपात्राङ्गं पाठसादेश्यात् । नतु पौरोडाशिकमिति समाख्यया पुरोडाशपात्राङ्गम् ।।४८ ।।

# (४९) समाख्यानिरूपणम्

समाख्या यौगिकः शब्दः । सा च द्विविधा ।
वैदिकीलौकिकी च । तत्र होतुश्चमसभक्षणाङ्गत्वम् ।
होतृश्चमस इति वैदिक्या समाख्यया ।
अध्वर्योस्तत्तत्पदार्थाङ्गत्वम् । लौकिक्या आध्वर्यवमिति
समाख्ययेति सङ्क्षेपः। तदेवं निरूपितानि सङ्क्षेपतः
श्रुत्यादीनि षद्प्रमाणानि।।४९।।

# (५०) विनियोगबोधिताङ्गानि

एतत्सहकृतेन विनियोगविधिना ‘समिदादिभिरुपकृत्य दर्शपूर्णमासाभ्यां यजेत’ इत्येवं रूपेण यानि नियोज्यन्ते तान्यङ्गानि द्विविधानि । सिद्धरूपाणि क्रियारूपाणि चेति । तत्र सिद्धानि जातिद्रव्यसङ्ख्यादीनि । तानि च दृष्टार्थान्येव । क्रियारूपाणि च द्विविधानि । गुणकर्माणि प्रधानकर्माणि च ।। एतान्येव सन्निपत्योपकारकाणि आरादुपकारकाणीति चोच्यन्ते ।। ५० ।।

# (५१) सन्निपत्योपकारकाणि

कर्माङ्गद्रव्याद्युद्देशेन विधीयमानं कर्म सन्निपत्योपकारकम् । यथाऽवघातप्रोक्षणादि । तच्च दृष्टार्थं अदृष्टार्थं दृष्टादृष्टार्थं चेति । तत्र दृष्टार्थमवघातादि । अदृष्टार्थं प्रोक्षणादि । दृष्टादृष्टार्थं पशुपुरोडाशादि। तद्धि द्रव्यत्यागांशेनैव अदृष्टं देवतोद्देशेन च देवतास्मरणं दृष्टं करोति ।। ५१ ।।

# (५२) आरादुपकारकाणि

द्रव्याद्यनुद्दिश्य केवलं विधीयमानं
कर्म आरादुपकारकम् । यथा
प्रायाजादि ।। ५२।।

# (५३) अपूर्वप्रक्रिया

आरादुपकारकं च परमापूर्वोत्पत्तावेवोपयुज्यते ।
सन्निपत्योपकारकं तु द्रव्यदेवतासंस्कारद्वारा
यागस्वरूपेऽप्युपयुज्यते । इदमेव चाश्रयिकर्मेत्युच्यते ।
तदेवं निरूपितः संक्षेपतो विनियोगविधिः ।।५३।।